ऽच्युतः। अणोरणीयान् महतो महीयानात्मास्य जन्तो-र्निहितो गुहायाम्। तेजोमयं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः" शङ्खः। "प्राणायाम-द्विषट्केन प्रत्याहार उदाहृतः। प्रत्याहारैर्द्वादश-भिर्द्धारणा परिकीर्त्तिता। भवेदीश्वरसङ्गत्यै ध्यानं द्वादशधारणम्" काशीख० ४१अ०। "समाहितेन मनसा चैतन्यान्तरवर्त्तिना। आत्मनोऽभीष्टदेवानां ध्यानं ध्यान-मिहोच्यते" शा०ति०। ध्यायतेऽनेन ध्यै-करणे ल्युट्। देवानां ७ध्येयरूपभेदे "ध्यानमस्याः प्रवक्ष्यामि यथा ध्यात्वार्च्चयेदिमाम्" तन्त्रसारः। "तस्य (वटुकस्य)ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः" तत्र सात्त्विकं यथा "वन्दे बालं स्फटिकसदृशं कुन्तलोद्भासिवक्त्रं दिव्याकल्पै-र्नवमणिमयैः किङ्किणीनूपुराद्यैः। दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानम्"। राजसं यथा "उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजम् स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः। नीलग्रीवमुदारभूषणशतं शीतांशुचूड़ो-ज्ज्वलं बन्धूकारुणवाससं भयहरं देवं सदा भावये" तन्त्रसा० तामसध्यानं तु तामसशब्दे दृ० उक्तम् देवानां स्वरूपभेदेनैव ध्येयत्वात् स्वरूपस्य ध्यानत्वम्। देवताप्रतिमाशब्दे च ३६८५पृ० येषां मूर्त्तिभेदा यथा द-र्शिताः तथैव तेषां ध्येयता। अन्यदेवताध्यानं तु तन्त्रसार कालिकापुराणादौ दृश्यम् विस्तरभयात् न लिखितम्। "ज्ञानात् ध्यानं विशिष्यते। ध्यानात् कर्मफलत्यागः गीता। "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योगमुत्तमम्" स्मृतिः। "इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः" रघुः "सर्वदेवाः प्राकृतिका यावन्तो मूर्त्तिधारिणः। अह-मात्मा नित्यदेहो भक्तध्यानानुरूपतः" ब्रह्मवै० जन्मख०। ८उपनिषद्भेदे उपनिषच्छब्दे १२२२ पृ० दृश्यम्।

**ध्यानजप्य** पु० विश्वामित्रवंश्ये ऋषिभेदे "पाणिनो बभ्रव-श्चैव ध्यानजप्यास्तथैव च" हरिवं० २७अ० विश्वामित्र-वंश्यर्षिकथने।

**ध्यानयोग** पु० ध्यानमेव योगः। ध्यानरूपे योगे योगाङ्ग-भेदे "ते ध्यानयोगानुगता अपश्यन्"श्वेताश्वतरोप०"ध्यानं नाम चित्तैकाग्र्यं तदेव योगो युज्यतेऽनेन इति ध्या-नव्यक्तीकारोपायस्तमनुगताः समाहिता अपश्यन्" भा० "ध्यानयोगेन संपश्येत् गतिमस्यान्तरात्मनः" मनुः।

**ध्यानाभ्यास** पु० ध्यानानामभ्यासः। समाधौ "ध्यानद्वाद-शकेनैव समाधिरभिधीयते" काशीख० ४२अ० उक्तेः समाधेर्ध्यानाभ्यासरूपत्वम्। "आगमेनानुमानेन ध्याना-भ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योग-मुत्तमम्" स्मृतिः।

**ध्यानिक** त्रि० ध्यानेन निर्वृत्तं ठक्। ध्यानसाध्ये "ध्या-निकं सर्वमेवैतत् यदेतदभिशब्दितम्" मनुः।

**ध्याम** न०ध्यायते पशुभिः ध्यै-कर्मणि मन्। १गन्धतृणे २मदन-वृक्षे च संज्ञायां कन्। ध्यामक। रोहिषतृणे राजनि०।

**ध्यामन्** पु० ध्यै-मनिन्। १परिमाणे २तेजसि च उज्ज्वल०-भावे मनिन्। चिन्तायां न० उणादिकोषः।

**ध्येय** त्रि०ध्यै-कर्मणि यत्। ध्यातव्ये "ध्येयः सदा सवि-तृमण्डलमध्यवर्त्ती" विष्णुध्यानम् "वेद्यश्च वेदिता चासि ध्याता ध्येयश्च यत्परम्" कुमा० ध्यानशब्दे उदा०।

**ध्यै** चिन्तने भ्वा०पर० सक० अनिट्। ध्यायति अध्यासीत्। दध्यौ "ध्यायतीव लेलायतीव" श्रुतिः। ध्यानशब्दे० उदा०। "ध्यायेत् नित्यं महेशम्" शिवध्यानम्।

**ध्र** त्रि० कस्मिंश्चिदुपपदे धृ-मूलविभुजा० क। धारके महीध्रः कुध्र इत्यादि।

**ध्रज** गतौ भ्वा० पर० सक० सेट्। ध्रजति अध्राजीत् अध्र-जीत् अयमिदित् ध्रञ्जति अध्रञ्जीत्। दध्राज दध्रञ्ज। ध्रज्यते ध्रञ्ज्यते। "उपध्रजन्तमद्र्यो विधन्नित्" ऋ०१। १४९।१ "इषा न यो ध्रजसा पत्मना" ऋ०६।३।७ ध्रज-असुन्। "ध्रजसा गतिशीलेन" भा०।

**ध्रजि** त्रि०ध्रज-गतौ इन्। गतौ ततः अस्त्यर्थे मतुप् ध्रजिमत् गतियुक्ते त्रि०। "धुनिर्वात इव ध्रजीमान्" ऋ०१।७९।१ दीर्घश्छा। ४ सः। अस्य यवादिगणे पाठश्चिन्त्यप्रयोजनः मादुपधत्वाभावेनवस्याप्रसक्तेः। [णीत् दध्राण।

**ध्रण** ध्वाने भ्वा० पर० अक० सेट्। ध्रणति अध्रणीत् अध्रा-

**ध्रस** कणश आदाने क्र्या०पर० सक० सेट्। ध्रस्नाति अध्र-सीत् अध्रासीत् दध्रास। उदित् ध्रसित्वा ध्रस्त्वा। ध्रस्तः।

**ध्र(ध्रा)** गतौ निघण्टुः। भ्वा०पर० सक०सेट् ध्रा अनिट्। ध्रति ध्राति अध्रीत् अध्रासीत्। दध्र दध्रौ "ध्रयति ध्रायति" इति तत्र निर्देशात् ध्रे ध्रै इत्यपि धातू गतौ भ्वा० पर० अनिटौ। तत्र ध्रे ध्रयति ध्रै ध्रायति इति आर्द्धधातुके ध्रावत्।

**ध्राक्ष** काङ्क्षे घोररवे च भ्वा० पर० सक० सेट् इदित्। ध्राङ्क्षति अध्राङ्क्षीत्। दध्राङ्क्ष इदित् ध्राङ्क्ष्यते।